# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – ३१-१-२०१०　　　　अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम्　　　　समयः–घण्टात्रयम्

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** 5

१. विपदि धैर्यं केषां प्रकृतिसिद्धम् ?

२. अर्जुनः कस्य वाक्येन नवीबभूव ?

३. सञ्जयः धृतराष्ट्राय किं व्याचख्यौ ?

४. सती कां जन्मने प्रपेदे ?

५. कस्य औषधं नास्ति ?

६. कालिन्दी का ?

७. चकोराः कथं क्षीयन्ते ?

८. बकासुरहनने कस्य प्रथमं भयमागतम् ?

**2 पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 10

१. घटोत्कचेन उक्तः समयः कः ?

२. राजवाहनेन सोमदत्तः किं अभाणि ?

३. केषां औषधं अस्ति ?

४. कुतः श्रीकृष्णः गृहीतरथाङ्गः अभवत् ?

५. गौरीपतिः मातङ्गं स्वप्ने किं अवदत् ?

६. पुरुषः कथं कैश्च परीक्ष्यते ?

७. ''गृहाण शस्त्रम्'' इति बकेन उक्तः भीमः किमिति प्रत्युवाच ?

**3 द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** 8

१. असिधाराव्रतं किम् ?



पश्चादनुवर्तते

२. कन्यका स्वमातरं किमाह ?

३. मातङ्गस्य पूर्ववृत्तान्तः कः ?

४. भीष्मः श्रीकृष्ण किम् आह ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. संप्रति महान् नयनोत्सवः सञ्जातः ।

२. विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।

३. गुणगृह्या वचने विपश्चितः ।

४. चिरायते खलु ब्राह्मणवटुः ।

**5 द्वयोः भावं विशदयत ।** 8

१. अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।

२. क्षययुक्तमपिस्वभावजं दधतं धाम शिवं समृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपश्चन्द्रमिव प्रजानृपम् ।।

३. सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नि क्षमा पुत्रः षडेते मम बान्धवाः ।।

**6 श्लोक पूर्णं लिखत ।** 4

उद्योगिनं ............................................... दोषः ।।
लब्ध्वा .................................................... पुरुषाधमस्य ।।

**7 एकस्य कवेः देशकालग्रन्थान् अधिकृत्य लिखत ।** 4

१) नीलकण्ठदीक्षितः          २) लक्ष्मणसूरिः

**8 एकस्य लघुटिप्पणीं लिखत ।** 4

१) भीष्मः          २) मातङ्गः

**9** **चत्वारि पदानि वाक्ये योजयत ।** 4

१) भ्रातॄन्   २) अकारि   ३) असंकृत्
४) प्रतिकर्तुं   ५) सम्प्रति   ६) बहुधा

**10** **चतुर्णां रूपाणि विवेचयत ।** 4

१) शुनः   २) उपेत्य   ३) धनिनः
४) उषित्वा   ५) हविषा   ६) ययाचे

**11** **चतुर्णां पर्यायपदानि लिखत ।** 4

१) बाणः   २) वनराजः   ३) नक्तंचरः
४) त्रयी   ५) आयोधनं   ६) इध्मजिह्वः

**12** **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१) सलिलमरुतां   २) वृष्टिवाताहतं   ३) रोषारुणनयनः
४) कुमारनिकरेण   ५) नगाधिराजः   ६) अपरागसमीरणेरितः

**13** **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१) सोऽवदत्   २) गुणेष्वेव   ३. मज्जत्वंभसि
४) दोषैकदृक्   ५) मशकैर्दंशैः   ६) कस्येदानीम्

**14** **द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१) अस्तु   २) धर्षयेत्   ३. त्रायतां   ४) शक्नोति

**15** **द्वयोःव्याकरणविशेषं लिखत ।** 4

१) आगच्छतु भवती   २) मा रुदः   ३) अलं विशङ्क्या

**16** **समासमेकं सलक्षणं विशदयत ।** 4

१) द्विगुः   २) अव्ययीभावः



पश्चादनुवर्तते

**17** **चतुर्थं पदं लिखत ।** 3

१) अर्जुनः ; कपिध्वजः ; भीष्मः ; ................

२) प्रतिमानाटकं ; रामायणात् ; बालचरितं ; ................

३) पठतु ; लोट् लकारः ; लेभे ; ................

**18** **प्रयोग परिवर्तनं एकस्य कुरुत ।** 3

१) तेन सत्यं उच्यते २) अयमस्मान् पीडयति

**19** **इतरवचनानि लिखत ।** 4

१) सुमनाः .............. .............. ।

२) .............. वर्तेयातां .............. ।

३) .............. .............. गहनेषु ।

४) .............. .............. नामसु ।

**20** **रिक्तस्थानानि पूरयत ।** 4

१) यः प्रोद्यत .............. रराज ।

२) .............. मोघा वरमधिगुणे ।

३) .............. नवनीतं निधाय तेन तं जिघृक्षसि ।

४) रुष्टोऽपि कुञ्जरः न व्याघ्रं .............. ।

★ ★ ★ ★ ★

# श्री सुरसरस्वती सभा शृङ्गेरि

## तुरीया परीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – ३१-१-२०१० | अङ्काः–५०

अपराह्णे – १-३० तः ३-०० पर्यन्तम् | समयः–सार्धैकहोरा

1 अ) विषयमेकमधिकृत्य दशभिः वाक्यैः प्रबन्धं लिखत - 6

१) पुस्तकालयः  २) श्रीशङ्कराचार्याः  ३) सत्यम्

आ) सतिसप्तमी नाम किम् ? विशदयत । 4

2 अ) कदा चतुर्थी विभक्तिः उपयुज्यते ? 4

अथवा

आ) वाक्यरचनोपयुक्तचिह्नानि कानि ? विशदयत ।

3 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत । 6

१. बभूव  २. पेचे  ३) वर्धिता  ४) अकार्षीत्

4 उत्प्रेक्षालङ्कारं सोदाहरणं विशदयत । 3

5 ''ददर्श चक्रीकृतचारुचापं'' अत्रत्यं वृत्तं सप्रस्तारं सलक्षणं च निरूपयत । 3

6 प्रयोगपरिवर्तनं कुरुत (द्वयोः) 4

१. तैः उपविश्यते  २. तमो नश्यतु

२. अस्माभिः स्थास्यते  ४. सः उपविशति

7 वाक्यदोषं परिहरत । 5

१. पाण्डवाः द्वादशवर्षाणि वने अवसत् ।

२. रामः दुर्जनं क्रुध्यति ।



पश्चादनुवर्तते

३. कृष्णः सान्दीपनेः प्रेमभाजः आसीत् ।
४. रामे स्वस्ति ।
५. भवान् मन्दिरं गच्छ ।

8 अन्यलिङ्गरूपं लिखत । 5

१. भ्राता   २. विद्वान्   ३. राजा   ४. कविः   ५. नटः

9 मातृभाषया अनुवादं कुरुत । (पञ्चानामेव) 5

१. यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् ।
२. गुरोः प्रसादेन विद्वांसः भूयास्म ।
३. धनिना दीयते धनम् ।
४. प्राणिषु मानवः अतिश्रेष्ठः ।
५. प्रतिज्ञापालनं हि परो धर्मः इति परिगणितः ।
६. रामो द्विर्नाभिभाषते ।

आ) संस्कृतेन अनुवदत (पञ्चानामेव) 5

1. He went when Cows were milked.
2. Among the Goddess I worship Saraswathi.
3. Let me pray to God.
4. If rain comes the rivers will flow high.
5. Let Sanskrit win alway.
6. Coconut tree is called as Kalpaka Vriksha.

1. ಹಸುಗಳನ್ನು ಕರೆಯುವಾಗ ಅವನು ಹೋದನು.
2. ದೇವತೆಗಳಲ್ಲಿ ನಾನು ಸರಸ್ವತಿಯನ್ನು ಪೂಜಿಸುತ್ತೇನೆ.
3. ದೇವರನ್ನು ಪ್ರಾರ್ಥಿಸಲು ಬಿಡು.
4. ಮಳೆ ಬಂದಾಗ ನದಿಗಳು ಉಕ್ಕಿ ಹರಿಯುತ್ತವೆ.
5. ಸಂಸ್ಕೃತಕ್ಕೆ ಸದಾ ಜಯವಾಗಲಿ.
6. ತೆಂಗಿನಮರವನ್ನು ಕಲ್ಪವೃಕ್ಷ ಎಂದು ಕರೆಯುತ್ತಾರೆ.

★ ★ ★ ★ ★